# श्रीमद्भगवद्गीता

## 'शङ्करानन्दी' व्याख्यासहिता

सम्पादकः

श्रीवासुदेव लक्ष्मण पणशीकरः

राष्ट्रिय–संस्कृत–संस्थान
(मानित विश्वविद्यालय)
नई दिल्ली-११००५८ (भारत)

# प्रस्तावना.

अयि वसुंधरावलयविभूषणायमानसद्गुणा विद्वन्मणयः, सुप्रसिद्धमेवेदं यत्सनातनकालत एवास्मदीयधर्मग्रन्थैः प्रबलप्रमाणार्पणपूर्वकमात्यन्तिकनिःश्रेयसाधिगममूलत्वेन निरूप्यमाणोऽप्यद्वैतसिद्धान्त इदानींतनसमयादेकोनपञ्चाशदधिकपञ्चविंशतिशतसमाभ्यः प्रागुत्पन्नेन शाक्यमुन्यपरनाम्ना गौतमबुद्धेन प्रवर्तितस्याऽथ च तत्र बहूनां धरापतीनां प्रवेशादतिमहदुज्जृम्भणमाप्तस्य बौद्धमतस्य तच्छाखान्तरीभूतस्य जैनमतस्य च प्रसरणेनातितनिमानमवाप्य रोगार्तदशामन्वभूत् । सच मलबारेतिप्रसिद्धकेरलदेशान्तर्गतकालपीग्रामे जनिमवाप्तवद्भिः **श्रीशंकराचार्यैः**[1] पुनररोगभावमापाद्य युवेव संपादितो बौद्धजैनमते च वैदिकप्रमाणप्रबलयुक्तिभिः संचूर्णिते । नैतावदेव कृतं किंत्वद्वैतविरुद्धास्तर्कपातञ्जलादिभागा अपि सप्रमाणाभिः प्रौढाभिश्च रीतिभिर्दुर्बलभावं निन्यिरे । अमुष्य सिद्धान्तस्य मुख्या विषया इमे सन्ति । जीवब्रह्मणोरैक्यं, ब्रह्मण एव सत्यत्वं, नामरूपाणां मिथ्यात्वं, सर्वदेशकालवस्त्वपरिच्छिन्नसत्ताकत्वमेव सत्त्वं, मिथ्यारूपस्य जगत आत्मनि कल्पितत्वं, कल्पनाप्यज्ञानेन वस्तुतो ब्रह्मव्यतिरिक्तसत्ताकं जगन्नास्त्येवेति च । इमे च विषया यद्यप्यपक्वविचाराणां मनसि न यथावन्निवेष्टारः प्रत्युताऽकर्णनसमय एव तेषामभिप्रायाननेकविधशङ्कासमूहैः प्रतिकूलयितार एव सन्ति तथापि यथार्थं तत्त्वावबोधगोचरा भवन्ति । येषां विचारशक्तिर्विद्यानां महति प्रदेशे चंक्रमणेन तत्तद्विषयाणां तलस्पर्शेन च नैर्मल्यमाप्ता, ते सर्वे तत्त्वज्ञानिनो न केवलमेतद्देशीयाः किंतु यूरोपवर्षीया अप्येतान्विषयान् गम्भीरानुभवेनोररीकुर्वन्ति । एतेषु विषयेषु ये चित्सुख्यद्वैतसिद्धिभेदधिक्कारादयः प्रौढग्रन्था निष्पन्नाः सन्ति

---

(१) एषां जन्मकालनिर्णये बह्व्यो विप्रतिपत्तयः सन्ति तथापि शोधयितॄणां बहुमतानुसारेण पञ्चचत्वारिंशदधिकाष्टशततमे ( ८४५ ) वैक्रमार्कवर्षेऽजनिषतेति अनुमीयते ।

# श्रीमद्भगवद्गीतानुक्रमणिका।

विषयाः पत्रं

## अथ प्रथमाध्यायस्यानुक्रमणिका।


टीकाकारकृतमङ्गलाचरणश्लोकाः ... ... ... ... १
अवतरणिकायां भारतस्य गीतायाश्च श्रेष्ठत्वनिरूपणपूर्वकं प्रथमाध्याये प्रतिपाद्यनिरूपणम् ... ... ... ... १
युद्धविषये धृतराष्ट्रप्रश्नः ... ... ... ... ... २
धृतराष्ट्रंप्रति संजयोक्तिः ... ... ... ... ... २
द्रोणाचार्यंप्रति पाण्डवसेनादर्शने साभिप्राया दुर्योधनस्य प्रेरणा. ३
पाण्डवसेनायां महारथानां नामानि श्लोकत्रयेण. ... ... ३
आचार्यंप्रति दुर्योधनेन स्वसेनानायकानां नामकथनं श्रेष्ठत्वकथनं च श्लोकत्रयेण.... ... ... ... ... ४
दुर्योधनेन स्वबलस्य पूर्णत्वकथनं पाण्डवबलस्यापूर्णत्वकथनं च. ४
भीष्मरक्षणे द्रोणादीन्प्रति दुर्योधनस्य प्रेरणा. ... ... ५
दुर्योधनहर्षार्थं भीष्मेण शङ्खवादनम्... ... ... ... ५
ततः सेनायां शङ्खादिवादनम् ... ... ... ... ५
ततः कृष्णार्जुनयोः शङ्खनिनादः ... ... ... ... ५
शङ्खानां निनादकर्तॄणां च नामानि श्लोकचतुष्टयेन ... ... ६
शङ्खनादेन धार्तराष्ट्राणां हृदयविदारणम् ... ... ... ६
वैराग्यार्थमैहिकामुष्मिकभोगानां कर्मजन्यानामनित्यत्वप्रतिपादनपूर्वकमर्जुनस्य धनुरुद्यमनम् ... ... ... ... ७
कृष्णंप्रत्यर्जुनवाक्यम् ... ... ... ... ... ७
अत्र युद्धार्थं केके आगताः कैः सह मया योद्धव्यं चेत्यर्जुनस्य जिज्ञासाया वर्णनं श्लोकद्वयेन. ... ... ... ... ७
भगवता सेनयोर्मध्ये रथं स्थापयित्वार्जुनाय समवेतानां योद्धॄणां दर्शनं कारितमिति निरूपणं श्लोकद्वयेन.... ... ... ८
उभयसेनयोः स्थितान्बन्धून्दृष्ट्वाऽर्जुनस्य विषादो जात इति निरूपणं श्लोकत्रयेण. ... ... ... ... ... ८
अर्जुनस्य विषादचिह्नसूचकानां वाक्यानां निरूपणं श्लोकत्रयेण. ९
अर्जुनस्याधर्मप्राप्तैहिकसुखेभ्यो विमुखत्ववर्णनं श्लोकद्वयेन.... १०
गुर्वादिहन्तुमनिच्छयाऽर्जुनस्य स्वर्गादिसुखेभ्यो विमुखत्ववर्णनं श्लोकद्वयेन. ... ... ... ... ... १०
कुटुम्बवधेन पापमेव भवेदिति निरूपणेनार्थशास्त्राद्धर्मशास्त्रस्य बलवत्ताप्रतिपादनम् ... ... ... ... ... ११

**मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।**
**आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥ १४ ॥**

**मात्रास्पर्शा इति** । चक्षुरादिज्ञानेन्द्रियैः सामान्येन मीयन्त इति मात्राः । वागाद्युभयेन्द्रियैः स्पृश्यन्ते गृह्यन्त इति स्पर्शाः शब्दादयो भोग्यपदार्थाः स्वयं शीतोष्णसुखदुःखदाः शीतोष्णवत्सुखदुःखदाः । शीतोष्णावनुकूलौ प्रतिकूलौ च सन्तौ यथा सुखं दुःखं च ददते तथैव शब्दादयोऽप्यनुकूलाः प्रतिकूलाश्च सन्तः सुखं दुःखं च ददत इत्यर्थः । यद्वा शब्दादयः प्रतिकूलमनुकूलं वा शीतमुष्णं वाप्यध्यात्ममुत्पाद्य तद्वारा साक्षाद्वा सुखं दुःखं च ददतीति शीतोष्णसुखदुःखदाः । ननु विषयेन्द्रियसंयोगस्य नित्यत्वात्तन्निमित्तकसुखदुःखयोरपि नित्यत्वे सत्यात्मविदस्तदनुसंधानं विना ब्रह्मानुसंधिः कथं सिध्यतीत्यत आह— **आगमेति** । आगम उत्पत्तिरपायो विनाशस्तद्वन्तो विषयास्तज्जन्यसुखदुःखादयश्च तडिद्वदनित्यास्तान् क्षणकालावस्थायिनो विषयान् तत्संयोगवियोगांश्च तितिक्षस्व । भारत भा ब्रह्मविद्या तस्यामेव रमत इति भारत हे कौन्तेय, मुमुक्षोर्नित्यसुखार्थिनः प्रारब्धादागतानां सुखदुःखादीनां सहनमवश्यं कर्तव्यं तत्सहनं कुर्वत एव श्रवणादि तज्जन्यं ज्ञानं तत्फलं चापि सिध्यत्यतस्त्वमेतेषां समागमसुखवद्वियोगदुःखं च सहस्व । प्रतिक्रियाचिन्ताविषादराहित्येन प्राप्तदुःखसहनं मुमुक्षोरुत्तमो धर्मः । तथाच श्रुतिः—'वृक्ष इव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत । उपल इव तिष्ठासेच्छिद्यमानो न कुप्येत न कम्पेत' इति देहेन्द्रियादयः शब्दादयश्चानित्याः आगमापायित्वाद्यन्नैवं तन्नैवं यथात्मेति, आत्मा नित्यः तदागमापायसाक्षित्वाद्यन्नैवं तन्नैवं यथा देह इत्याद्यनुमानेन देहेन्द्रियादीनामनित्यत्वं तत्साक्षिण आत्मनो नित्यत्वं चात्रापि सूचितं भवति ॥ १४ ॥

तितिक्षुत्वमेव विवेकवैराग्यशमदमसंन्याससहितं श्रवणादिसाधनं सत्तज्जन्यज्ञानद्वारा मोक्षफलदं भवतीत्याह—

**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।**
**समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥ १५ ॥**

**यं हीति** । सर्वदुःखसहनपूर्वकं निरन्तरब्रह्मनिष्ठया यः कैवल्यं संपादयति स एव पुरुषोत्तम इति सूचयितुमिदं संबोधनम् । हे पुरुषर्षभार्जुन, धीरं विषयग्रहणेभ्यो धियं राति निगृह्णातीति धीरः सदात्मनिष्ठस्तम् । अतएव समदुःखसुखं समे दुःखसुखे यस्य तं सुखदुःखयोः प्राप्तयोरविकारात्मना तिष्ठन्तम् । यद्वा समे समभावं ब्रह्मभावं गमिते दुःखसुखे यस्य